क्र.नं.3

वेदान्त

शंकराचार्य - गीताभाष्यं

४६४/९८

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

॥अथश्रीमद्भगवद्गीतायाःशांकरभाष्यस्यप्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥श्रीगणेशायनमः॥ ॥नारायणःपरोव्यक्तादंडमव्यक्तसंभवं। अंडस्यांतस्त्विमेलो॥
काः सप्तद्वीपाचमेदिनी॥१॥ सभगवान्सृष्ट्वेदंजगत्तस्यचस्थितिंचिकीर्षुर्मरीच्यादी॥
न्ऽग्रेसृष्ट्वाप्रजापतीन्प्रवृत्तिलक्षणंधर्मंग्राहयामासवेदोक्तं। ततोऽन्यांश्चसनका
दीनुत्पाद्यनिवृत्तिधर्मंज्ञानवैराग्यलक्षणंग्राहयामास॥ द्विविधोहिवेदोक्तधर्मः प्र
वृत्तिलक्षणोनिवृत्तिलक्षणश्चजगतःस्थितिकारणंप्राणिनामभ्युदयनिःश्रेयस
हेतुर्यः सधर्मोब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चश्रेयोऽर्थिभिरनुष्ठीयमानोदीर्घे
णकालेनाऽनुष्ठातॄणांकामोद्भवाद्धीयमानविज्ञानहेतुकेनाऽधर्मेणाभिभूय

(२)



Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

मानेधर्म्मेप्रवर्द्धमानेचाधर्म्मेजगतःस्थितिंपरिपिपालयिषुःसआदिकर्त्तानारा।
यणाख्योविष्णुर्भौमस्यब्रह्मणोब्राह्मणत्वस्यरक्षणार्थंदेवक्यांवसुदेवादंशेनकिलसं
बभूव।ब्राह्मणत्वस्यहिरक्षणेनरक्षितःस्याद्वैदिकोधर्मः।तदधीनत्वाद्वर्णाश्रम
भेदानां।सचभगवान्ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसदासंपन्नः।त्रिगुणात्मि
कांवैष्णवींस्वांमायांप्रकृतिंवशीकृत्याजोऽव्ययोभूतानामीश्वरोनित्यशुद्धबुद्धमुक्त।
स्वभावोपिस्वमाययादेहवानिवजातइवचलोकानुग्रहंकुर्वन्लक्ष्यते।स्वप्रयो।
जनाभावेपिभूतानुजिघृक्षयावैदिकंधर्म्मद्वयमर्ज्जुनायशोकमोहमहोदधौ

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

निमग्नायोपदिदेश। गुणाधिकैर्हि गृहीतोनुष्ठीयमानश्च धर्म्मः प्रचयं गमिष्यती
ति।। तं धर्म्मं भगवतायथोपदिष्टं भगवान् वेदव्यासः सर्वज्ञो गीताख्यैः सप्तभिः श्लोक
शतैरुपनिबबंध। तदिदं गीताशास्त्रं समस्तवेदार्थसंग्रहभूतं दुर्विज्ञेयार्थं त
दर्थाविष्करणार्थायानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमप्यत्यंतविरुधानेका
र्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विव
रणं करिष्यामि। तस्यास्य शास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतु
कस्य संसारस्यात्यंतोपरमलक्षणं तच्च सर्वकर्म्मसंन्यासपूर्वकादात्मज्ञान

(3A)

निष्ठारूपाश्रमाद्भवति।तथाइममेवगीतार्थंधर्म्मसुद्दिश्यभगवतैवोक्तं।सहिधा।
र्म्मःसुपर्याप्तोब्रह्मणः पदवेदनइत्यनुगीतासुतत्रैवचोक्तं।नैवधर्मीनचाधर्मी
नचैवहिशुभाशुभीयःस्यादेकासनेलीनस्तूष्णींकिंचिदचिंतयन्।ज्ञानंसन्यासल
क्षणमिति।इहापिचांतउक्तमर्जुनायसर्वधर्म्मान्परित्यज्यमामेकंशरणंव्र
जेति।अभ्युदयार्थोपिप्रवृत्तिलक्षणोधर्म्मोवर्णाश्रमांश्चोद्दिश्यविहितः।सदे
वादिस्थानप्राप्तिहेतुरपिसन्नीश्वरार्पणबुध्यानुष्ठीयमानःसत्त्वशुद्धयेभव
तिफलाभिसंधिवर्जितःशुद्धसत्त्वस्यज्ञाननिष्ठायोग्यताप्राप्तिद्वारेणज्ञानोत्प

त्रिहेतुत्वेनत्व निःश्रेयसहेतुत्वमपिप्रतिपद्यते।तथाचवक्ष्यति।ब्रह्मण्याधायक
र्म्माणि॥योगिनः॥कर्म्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धयेइति॥इमंद्विःप्रकारंधर्म्मंनिःश्रेय
सप्रयोजनं।परमार्थतत्वंवासुदेवाख्यंचपरंब्रह्माभिधेयभूतंविशेषतोभिव्यंज
यद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रं।तेनैयस्तदर्थविज्ञानेसमस्तपुरुषा
र्थसिद्धिरित्यतस्तद्विवरणेयत्नःक्रियतेमया।तत्रचदृष्ट्वातुपांडवानीकंइत्यारभ्य
यावन्नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवहइत्येतदंतःप्राणिनांशोकमोहा
दिसंसारबीजभूतदोषोद्भवकारणप्रदर्शनार्थत्वेनव्याख्येयोग्रंथः।तथाहि।

(५ A.)

न२ धिबां।

र्जुनेनराज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवेष्वहमेषांममैतइत्येवंप्रत्ययनि
मित्तस्नेहविछेदादिनिमित्तावात्मनःशोकमोहौप्रदर्शितौकथंभीष्ममहंसंख्येइ।
त्यादिना।शोकमोहाभ्यांह्यभिभूतविवेकविज्ञानःस्वतएवक्षात्त्रधर्म्मेयुद्धेप्रवृत्तोपि
तस्माद्युद्धादुपररामपरधर्मंचभिक्षाजीवनादिकर्तुंप्रववृते।तथाचसर्वप्रा
णिनांशोकमोहादिदोषाविष्टचेतसांस्वभावतएवस्वधर्मपरित्यागःप्रतिषिद्धसे
वाचस्यात्।स्वधर्म्मेप्रवृत्तानामपितेषांवाङ्मनःकायादीनांप्रवृत्तिःफलाभिसं
धिपूर्विकैवसाहंकाराचभवति।तत्रैवंसतिधर्म्माधर्म्मोपचयादिष्टानिष्टजन्मसु

(5)

खदुःखादिसंज्ञाखिलक्षणः संसारोनुपरतोनवच्छिन्नः संसारबीजभूतौ शोकमो
हौ। तयोश्च सर्वकर्मसंन्यासादात्मज्ञानात् नान्यतो निवृत्तिरिति। तदुपदिदिक्षुः सर्वलोका
नुग्रहार्थमर्जुनं निमित्तीकृत्याह भगवान्वासुदेवोऽशोच्यानित्यादि। अत्र केचिदा
हुः सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत
एव। किं तर्हि अग्निहोत्रादिश्रौतस्मार्तकर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति सर्वा — राम
सु गीतासु निश्चितोर्थ इति। ज्ञापकं चाहुरस्यार्थस्य। अथ चेत्त्वमिमं धर्म्यं संग्रामं — त्वा४
न करिष्यसि। ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥ कर्मण्येवाधिकारस्ते

(5A)

स्तो। ऊरु कर्म्मैव तस्मान् त्वमित्यादि। हिंसायुक्तत्वाद्वैदिकं कर्म्माधर्म्मायेतीय।
मप्याशंका न कार्या। कथं क्षात्रं कर्म्म युद्धलक्षणं गुरुत्वाद्युद्धादिहिंसालक्षणं
अत्यंतक्रूरमपि स्वधर्म्म इति ज्ञात्वा नाधर्म्माय गुरुत्वाद्युद्धादिहिंसालक्षणं अ
त्यंतक्रूरमपि स्वधर्म्म धर्म्माय। तदकरणे च ततः स्वधर्म्मं कीर्त्तिं च हित्वा पापमवाप्स्य
सि इति ब्रुवता यावज्जीवादिश्रुतिनोदितानां पश्वादिहिंसालक्षणानां च कर्म्मणां
प्रागेव नाधर्म्मत्वमिति सुनिश्चितमुक्तं भवतीति। तदेवं ज्ञानकर्म्मणी विषयौ वि
भागवच्चनात् बुद्धिद्वयाश्रययोः शोच्यानित्यादिना भगवता यावत् स्वधर्म्मम

Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

मपिचावेद्ध्येत्येतदंतेनग्रंथेनयत्परमार्थात्मतत्वनिरूपणंकृतंतत्सांख्यंतद्विषया
बुध्धिरात्मनोजन्मादिषड्विक्रियाभावात्। अकर्त्तात्मेतिप्रकरणार्थनिरूपणाद्या।
जायतेसासांख्येबुध्धिः। सा येषांउचितान्नवंतितेसांख्याः। एतस्याबुध्धेर्जन्मनःप्रागा।
त्मनोदेहादिव्यतिरिक्तकर्तृत्वभोक्तृत्वाद्यपेक्षोधर्माधर्मविवेककोमोक्षसाधना
नुष्ठाननिरूपणलक्षणोयोगः तद्विषयाबुध्धिः सायोगेबुध्धिःसाबुध्धिःयेषांकर्मि
णांउचितान्नवंतितेयोगिनः। तथाचभगवताविभक्तेबुध्धीनिर्दिष्टेएषातेऽभि।
हितासांख्येबुध्धिर्योगेत्विमांशृणुइत्यादि। तयोश्चसांख्यबुध्ध्याश्रयांज्ञानयो



विवेक
राम
५

(6A)

गेननिष्ठांसांख्यानांविनिक्तांवक्ष्यति। पुरावेदात्मनामयाप्रोक्तेति। तथाच योगबु॥
ध्याश्रयांकर्म्मयोगेननिष्ठांविनक्तांवक्ष्यति कर्म्मयोगेनयोगिनामिति। एवं सांख्य
बुधियोगंबुधिंचाश्रित्यद्वेनिष्ठेविभक्तेभगवतोक्तेस्तानकर्म्मणांऽकर्तृत्वा कर्तृत्वैक क
त्वानेकत्वबुध्याश्रययोरेकपुरुषानुष्ठेयत्वासंभवंपश्यतायथैतद्विनागवचनं
तथैवदर्शितंशातपथीयेब्राह्मणे। एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंती
न्यासं २ तिसर्वकर्मसंविधायतच्छेषेणकिंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइ
ति। तत्रच प्राग्दारपरिग्रहात्पुरुषश्चात्माप्राकृतोधर्म्मजिज्ञासोत्तरकालंलो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

कत्रयसाधनं पुत्रं द्विप्रकारं च वित्तं मानुषं दैवं च। तत्र मानुषं वित्तं कर्मरूपं पितृलो
कप्राप्तिसाधनं। विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनमकामयंत ते ह्यविद्याका
मवंत एव कर्माणि श्रौतानि दर्शितानि तेभ्यो व्युत्थाय प्रव्रजंतीति व्युत्थानमात्मा
नमेव लोकमिच्छतोऽकामस्य विहितं तदेतद्भगवद्वचनमनुपपन्नं स्यात् यदि
श्रौतकर्मज्ञानयोः समुच्चयः समुच्चयोऽभिप्रेतो न चार्जुनस्य प्रश्न उपपन्नो ज्या
यसी चेत्कर्मणस्ते इत्यादिरेकपुरुषानुष्ठेयत्वासंभवं बुद्धिकर्मणोर्भगवताऽपू
र्वमनुक्तं कथमर्जुनोऽश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव।

(7A)

ज्यायसीचेत्कर्मणास्तेमताबुधिरिति।किंच।यदिबुधिकर्म्मणोःसर्वेषांसमुच्चयउ।
क्तंस्यादर्ज्जुनस्यापिउक्तएवेति।यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितंइति।कथमु
भयोपदेशेसत्यन्यतरविषयएवप्रश्नःस्यात्नहिपित्तप्रशमनार्थिनोवैद्येनमधु
रंशीतंचभोक्तव्यमित्युपदिष्टेतयोरन्यतरत्पित्तप्रशमनकारणंब्रूहीतिप्रश्नः सं
भवति।अथाप्यर्जुनस्यभगवदुक्तार्थविवेकानवधारणनिमित्तःप्रश्नःकल्प्येतत
थापिभगवताप्रश्नानुरूपंप्रतिवचनंदेयं।मयाबुद्धिकर्म्मणोःसमुच्चयउक्तः
किमर्थमित्थंत्वंभ्रांतोसीति।नतुपुनःप्रतिवचनमनुरूपंपृष्टादन्यदेवद्वेनिष्ठे

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(.8)

व१

मयापुराप्रोक्तेइतिवक्तुंयुक्तंनापिस्मार्त्तेनैवकर्म्मणाबुधेःसमुच्चयेऽभिप्रेतेविभा
गवचनादिसर्व्वमुपपन्नंकिंचक्षत्रियस्ययुद्धंस्मार्त्तंकर्मस्वधर्मइतिजानतःतत्किंक
र्म्मणिघोरेमांनियोजयसीत्युपालंभोऽनुपपन्नस्तस्माद्गीताशास्त्रेईषन्मात्रेणा
पिश्रौतेनस्मार्त्तेनवाकर्म्मणाऽऽत्मज्ञानस्यसमुच्चयोनकेनचिद्दर्शयितुंशक्यःयस्य
त्वज्ञानाद्रागादिदोषतोवाकर्म्मणिप्रवृत्तस्ययज्ञेनदानेनतपसावाविशुद्ध।
सत्वस्यज्ञानमुत्पन्नंपरमार्थतत्वविषयमेकमिदंसर्व्वंब्रह्माकर्तृचेतितस्य।
कर्म्मणिकर्मप्रयोजनेनिवृत्तेपिलोकसंग्रहार्थंयत्नपूर्व्वंयथाप्रवृत्तिस्तथैवप्र

(8A)

हृत्तस्ययत्स्वहन्निरूपंदृश्यतेनतत्कर्म्मयेनबुधैःसमुच्चयःस्याद्यथाभगवतोवा
सुदेवस्यज्ञात्रकर्मचेष्टितंतंज्ञानेनसमुच्चीयतेपुरुषार्थमिक्षयेतद्वत्तात्फ
लाभिसंधपूर्वकारानावस्यतुल्यत्वातविदुषःतत्वविन्नाहंकरोमीतिमन्यतेनच
तत्फलमनुसंधत्ते।यथाचस्वर्गादिकामार्थिनोऽग्निहोत्रादिकाम्यसाधनानु
ष्ठानायाद्दितामेःकाम्यएवाग्निहोत्रादौप्रवृत्तस्यमामिच्छतेविनष्टेऽपिकामे
तदेवाग्निहोत्राद्यनुतिष्ठतोनतत्काम्यामग्निहोत्रादिनवति।तथाचदर्शयति
भगवान्।कुर्वन्नपिनकरोतिनलिप्यतइतितत्त्रत्रयस्यद्वैःद्वर्वतरंह्नतंका।

॥१शिति

र्म्मणैवहिसंसिद्धिमास्थिताजनकादयइतितत्रत्रविन्नप्यविज्ञेयंतत्कथयंयदि
तावज्जनकादयस्तत्वविदोऽपिप्रवृत्तकर्म्माणःस्युः॥तेलोकसंग्रहार्थंगुणा
गुणेषुवर्त्तंतइतिज्ञानेनैवसंसिद्धिमास्थिताः।कर्म्मसंन्यासेप्राप्तेऽपिकर्मणा
सहैवसंसिद्धिमास्थिताः।नकर्मसंन्यासंकृतवंतइत्यर्थः।अथनतेतत्वविदः
ईश्वरसमर्पितेनकर्म्मणासाधनभूतेनसंसिद्धिंसत्वशुद्धिंज्ञानोत्पत्तिल
क्षणांवासंसिद्धिमास्थिताजनकादयइतिव्याख्येयं।एवमेवार्थंभगवा
न्वक्ष्यति।सत्वशुद्धयेकर्मकुर्वंतीति।स्वकर्मणातमभ्यर्च्यसिद्धिंविंदति

मानवइतिउक्त्वासिद्धिंप्राप्तस्यतुपुनर्ज्ञाननिष्ठांवक्ष्यति।सिद्धिंप्राप्तोयथाब्रह्मेत्यादि
ना।तस्माद्गीतासुकेवलादेवतत्वज्ञानान्मोक्षप्राप्तिर्नकर्म्मसमुच्चितादितिनिश्चि
तोऽर्थः।यथाचायमर्थः।तथाप्रकरणशोविभज्यतत्रतत्रप्रदर्शयिष्यामः।तत्रैवंध
र्म्मसंमूढचेतसोऽर्जुनस्यमहतिशोकसागरेनिमग्नस्यात्मज्ञानादन्यत्रोद्धरण
मपश्यन्भगवान्वासुदेवस्ततोऽर्जुनमुद्दिधारयिषुरात्मज्ञानायावतारय
न्नाह।अशोच्यानित्यादिना॥ ॥अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे।ग
तासूनगतासूंश्चनानुशोचंतिपंडिताः॥नशोच्याअशोच्याभीष्मद्रोणादयः।

सद्भूतत्वात्। परमार्थस्वरूपेणचनित्यत्वात्।तानऽशोच्यानन्वशोचोऽनुशोचि।
तवानसिते म्रियंते मन्निमित्तं अहं तैर्विनाभूतः किंकरिष्यामिराज्यसुखा।
दिनेति त्वं प्रज्ञावतां बुद्धिमतां वादांश्चभाषसे।तदेतन्मौढ्यं पांडित्यंच
विरुद्धमात्मनि दर्शयसि।उन्मत्त इव इत्यभिप्रायो यस्माद्गतासून्गतप्राणान्
मृतानगतासूनगतप्राणानमृतान्जीवतश्चनशोचंति पंडिताः आत्मज्ञास्तेविदितः पर
मार्थतः पांडित्यं निर्विद्येति उक्तेः। परमार्थतस्तु नित्यानशोच्याननुशोचसि अतो
मूढोसीत्यभिप्रायः। कुतस्तेन शोच्याः यतो नित्याः कथं॥१२॥ नत्वेवाहंजातुना

(10 A)

संनत्वंनेमेजनाधिपाः।नचैवनभविष्यामःसर्वेवयमतःपरं॥१२॥नतुएवजातुकदा

चिदपिअहंननासंकिंतुआसमेवातीतेषुदेहोत्पत्तिविनाशेषुघटादिषुवियदिवनि नार

त्यएवाहमासमित्यभिप्रायः।तथानत्वंनासीःकिंतुआसीरेव।तथानेमेजनाधिपा

नासन्किंत्वासन्नेव।तथानचनभविष्यामःकिंतुभविष्यामएवसर्वेवयमतोऽस्माद्दे

हविनाशात्परंउत्तरकालेपित्रिष्वपिकालेषुनित्याआत्मस्वरूपेणेत्यभिप्रायः।

देहभेदानुवृत्त्याबहुवचनंनात्मभेदाभिप्रायेण।तत्रकथमिवनित्यआत्मा इति।

दृष्टांतमाह॥ ॥देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा।तथादेहांतरप्राप्ति

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com